# Tattva Bodha
## तत्त्वबोधः

श्रीशङ्करभगवत्पादाचार्यप्रणीतः

**INVOCATION**

वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुम् ।
मुमुक्षूणां हितार्थाय तत्त्वबोधोभिधीयते ॥

साधनचतुष्टयसम्पन्नाधिकारिणां मोक्षसाधनभूतं तत्त्वविवेकप्रकारं वक्ष्यामः ।

### १ SADHANA CHATUSHTAYA (The four-fold qualifications)

साधनचतुष्टयं किम् ?

नित्यानित्यवस्तुविवेकः ।

इहामुत्रार्थफलभोगविरागः ।

शमादिषट्कसम्पत्तिः ।

मुमुक्षुत्वं चेति ।

१.१ VIVEKA (Discrimination)

नित्यानित्यवस्तुविवेकः कः ?

नित्यवस्त्वेकं ब्रह्म तद्व्यतिरिक्तं सर्वमनित्यम् ।

अयमेव नित्यानित्यवस्तुविवेकः ।

१.२ VAIRAGYA (Dispassion)

विरागः कः ?

इहस्वर्गभोगेषु इच्छाराहित्यम् ।

१.३ SHATKA SAMPATTI

शमादिसाधनसम्पत्तिः का ?

शमो दम उपरमस्तितिक्षा श्रद्धा समाधानं च इति ।

१.३.१ SAMA

शमः कः ?

मनोनिग्रहः ।

१.३.२ DAMA

दमः कः ?

चक्षुरादिबाह्येन्द्रियनिग्रहः ।

१.३.३ UPARAMA OR UPARATI

उपरमः कः ?

स्वधर्मानुष्ठानमेव ।

१.३.४ TITIKSHA

तितिक्षा का ?

शीतोष्णसुखदुःखादिसहिष्णुत्वम् ।

१.३.५ SHRADDHA

श्रद्धा कीदृशी ?

गुरुवेदान्तवाक्यादिषु विश्वासः श्रद्धा ।

१.३.६ SAMADHANA

समाधानं किम् ?

चित्तैकाग्रता ।

१.४ MUMUKSHUTVAM

मुमुक्षुत्वं किम् ?

मोक्षो मे भूयाद् इति इच्छा ।

एतत् साधनचतुष्टयम् ।

ततस्तत्त्वविवेकस्याधिकारिणो भवन्ति ।

## २ TATTVA VIVEKA (Enquiry into Truth)

तत्त्वविवेकः कः ?

आत्मा सत्यं तदन्यत् सर्वं मिथ्येति ।

आत्मा कः ?

स्थूलसूक्ष्मकारणशरीराद्व्यतिरिक्तः पञ्चकोशातीतः सन्

अवस्थात्रयसाक्षी सच्चिदानन्दस्वरूपः सन्

यस्तिष्ठति स आत्मा ।

२.१ THE FIVE SHEATHS (Pancha Kosa)

२.२ SHARIRA TRAYA (The Three Bodies)

२.३ AVASTHA TRAYA (The Three States)

२.४ SATCHIDANANDA SVARUPA (Existence-Knowledge-Bliss)

## ३ STHULA-SUKSHMA-KARANA SHARIRAS (Sharira-Traya)

३.१ STHULA SHARIRA

स्थूलशरीरं किम् ?

पञ्चीकृतपञ्चमहाभूतैः कृतं सत्कर्मजन्यं

सुखदुःखादिभोगायतनं शरीरम्

अस्ति जायते वर्धते विपरिणमते अपक्षीयते विनश्यतीति

षड्विकारवदेतत्स्थूलशरीरम् ।

३.२ SUKSHMA SHARIRA

सूक्ष्मशरीरं किम् ?

अपञ्चीकृतपञ्चमहाभूतैः कृतं सत्कर्मजन्यं

सुखदुःखादिभोगसाधनं

पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि पञ्चप्राणादयः

मनश्चैकं बुद्धिश्चैका

एवं सप्तदशाकलाभिः सह यत्तिष्ठति तत्सूक्ष्मशरीरम् ।

३.२.१ JNANA INDRIYAS (Organs of Perception)

श्रोत्रं त्वक् चक्षुः रसना घ्राणम् इति पञ्च ज्ञानेन्द्रियाणि ।

श्रोत्रस्य दिग्देवता ।

त्वचो वायुः ।

चक्षुषः सूर्यः ।

रसनाया वरुणः ।

घ्राणस्य अश्विनौ ।

इति ज्ञानेन्द्रियदेवताः ।

श्रोत्रस्य विषयः शब्दग्रहणम् ।

त्वचो विषयः स्पर्शग्रहणम् ।

चक्षुषो विषयः रूपग्रहणम् ।

रसनाया विषयः रसग्रहणम् ।

घ्राणस्य विषयः गन्धग्रहणम् इति ।

### ३.२.२ KARMA INDRIYAS (Organs of Action)

वाक्पाणिपादपायूपस्थानीति पञ्चकर्मेन्द्रियाणि ।

वाचो देवता वह्निः ।

हस्तयोरिन्द्रः ।

पादयोर्विष्णुः ।

पायोर्मृत्युः ।

उपस्थस्य प्रजापतिः ।

इति कर्मेन्द्रियदेवताः ।

वाचो विषयः भाषणम् ।

पाण्योर्विषयः वस्तुग्रहणम् ।

पादयोर्विषयः गमनम् ।

पायोर्विषयः मलत्यागः ।

उपस्थस्य विषयः आनन्द इति ।

### ३.३ KARANA SHARIRA

कारणशरीरं किम् ?

अनिर्वाच्यानाद्यविद्यारूपं शरीरद्वयस्य कारणमात्रं
सत्स्वरूपाऽज्ञानं निर्विकल्पकरूपं यदस्ति तत्कारणशरीरम् ।

## ४ AVASTHA TRAYA (The Three States)

अवस्थात्रयं किम् ?

जाग्रत्स्वप्नसुषुप्त्यवस्थाः ।

४.१ JAGRAT AVASTHAA (Waking State)

जाग्रदवस्था का ?

श्रोत्रादिज्ञानेन्द्रियैः शब्दादिविषयैश्च ज्ञायते इति यत् सा जाग्रदावस्था ।

स्थूल शरीराभिमानी आत्मा विश्व इत्युच्यते ।

४.२ SVAPNA AVASTHA (Dream State)

स्वप्नावस्था केति चेत् ?

जाग्रदवस्थायां यद्दृष्टं यद् श्रुतम् तज्जनितवासनया निद्रासमये यः प्रपञ्चः प्रतीयते सा स्वप्नावस्था ।

सूक्ष्मशरीराभिमानी आत्मा तैजस इत्युच्यते ।

४.३ SUSHUPTI AVASTHA (Deep-sleep State)

अतः सुषुप्त्यवस्था का ?

अहं किमपि न जानामि सुखेन मया निद्राऽनुभूयत इति सुषुप्त्यवस्था ।

कारणशरीराभिमानी आत्मा प्राज्ञ इत्युच्यते ।

## ५ PANCHA KOSHAS

पञ्च कोशाः के ?

अन्नमयः प्राणमयः मनोमयः विज्ञानमयः आनन्दमयश्चेति ।

५.१ ANNAMAYA KOSHA (Food Sheath)

अन्नमयः कः ?

अन्नरसेनैव भूत्वा अन्नरसेनैव वृद्धिं प्राप्य अन्नरूपपृथिव्यां

यद्विलीयते तदन्नमयः कोशः स्थूलशरीरम् ।

५.२ PRANAMAYA KOSHA (Vital Air Sheath)

प्राणमयः कः ?

प्राणाद्याः पञ्चवायवः वागादीन्द्रियपञ्चकं प्राणमयः कोशः ।

५.३ MANOMAYA KOSHA (Mental Sheath)

मनोमयः कोशः कः ?

मनश्च ज्ञानेन्द्रियपञ्चकं मिलित्वा यो भवति स मनोमयः कोशः ।

५.४ VI~nANAMAYA KOSHA (Intellectual Sheath)

विज्ञानमयः कः ?

बुद्धिज्ञानेन्द्रियपञ्चकं मिलित्वा यो भवति स विज्ञानमयः कोशः ।

५.५ ANANDAMAYA KOSHA (Bliss Sheath)

आनन्दमयः कः ?

एवमेव कारणशरीरभूताविद्यास्थमलिनसत्त्वं प्रियादिवृत्तिसहितं सत् आनन्दमयः कोशः ।

एतत्कोशपञ्चकम् ।

५.६ PANCHAKOSHATITA

मदीयं शरीरं मदीयाः प्राणाः मदीयं मनश्च
मदीया बुद्धिर्मदीयं अज्ञानमिति स्वेनैव ज्ञायते
तद्यथा मदीयत्वेन ज्ञातं कटककुण्डल गृहादिकं
स्वस्माद्भिन्नं तथा पञ्चकोशादिकं स्वस्माद्भिन्नम्
मदीयत्वेन ज्ञातमात्मा न भवति ॥

## ६ ATMAN

आत्मा तर्हि कः ?

सच्चिदानन्दस्वरूपः ।

सत्किम् ?

कालत्रयेऽपि तिष्ठतीति सत् ।

चित्किम् ?

ज्ञानस्वरूपः ।

आनन्दः कः ?

सुखस्वरूपः ।

एवं सच्चिदानन्दस्वरूपं स्वात्मानं विजानीयात् ।

## ७ JAGAT (The Universe)

अथ चतुर्विंशतितत्त्वोत्पत्तिप्रकारं वक्ष्यामः ।

ब्रह्माश्रया सत्त्वरजस्तमोगुणात्मिका माया अस्ति ।

### ७.१ BRAHMAN

### ७.२ MAYA

### ७.३ CREATION

#### ७.३.१ EVOLUTION OF THE FIVE ELEMENTS

ततः आकाशः सम्भूतः ।

आकाशाद् वायुः ।

वायोस्तेजः ।

तेजस आपः ।

अब्दयः पृथिवी ।

#### ७.३.२ EVOLUTION OF THE SATTVA ASPECT

##### ७.३.२.१ ORGANS OF PERCEPTION

एतेषां पञ्चतत्त्वानां मध्ये

आकाशस्य सात्विकांशात् श्रोत्रेन्द्रियं सम्भूतम् ।

वायोः सात्विकांशात् त्वगिन्द्रियं सम्भूतम् ।

अग्नेः सात्विकांशात् चक्षुरिन्द्रियं सम्भूतम् ।

जलस्य सात्विकांशात् रसनेन्द्रियं सम्भूतम् ।

पृथिव्याः सात्विकांशात् घ्राणेन्द्रियं सम्भूतम् ।

### ७.३.२.२ ANTAHKARANA (Mind)

एतेषां पञ्चतत्त्वानां समष्टिसात्विकांशात् मनोबुद्ध्यहङ्कार चित्तान्तःकरणानि सम्भूतानि ।

सङ्कल्पविकल्पात्मकं मनः ।

निश्चयात्मिका बुद्धिः ।

अहंकर्ता अहंकारः ।

चिन्तनकर्तृ चित्तम् ।

मनसो देवता चन्द्रमाः ।

बुद्धे ब्रह्मा ।

अहंकारस्य रुद्रः ।

चित्तस्य वासुदेवः ।

### ७.३.३ EVOLUTION OF THE RAJAS ASPECT

एतेषां पञ्चतत्त्वानां मध्ये आकाशस्य राजसांशात् वागिन्द्रियं सम्भूतम् ।

वायोः राजसांशात् पाणीन्द्रियं सम्भूतम् ।

वन्हेः राजसांशात् पादेन्द्रियं सम्भूतम् ।

जलस्य राजसांशात् उपस्थेन्द्रियं सम्भूतम् ।

पृथिव्या राजसांशात् गुदेन्द्रियं सम्भूतम् ।

एतेषां समष्टिराजसांशात् पञ्चप्राणाः सम्भूताः ।

### ७.३.४ EVOLUTION OF THE TAMASIC ASPECT

एतेषां पञ्चतत्त्वानां तामसांशात् पञ्चीकृतपञ्चतत्त्वानि भवन्ति ।

पञ्चीकरणं कथम् इति चेत् ।

एतेषां पञ्चमहाभूतानां तामसांशस्वरूपम्

एकमेकं भूतं द्विधा विभज्य

एकमेकमर्धं पृथक् तूष्णीं व्यवस्थाप्य

अपरमपरमर्धं चतुर्धा विभज्य स्वार्धमन्येषु अर्धेषु स्वभागचतुष्टयसंयोजनं कार्यम् ।

तदा पञ्चीकरणं भवति ।

एतेभ्यः पञ्चीकृतपञ्चमहाभूतेभ्यः स्थूलशरीरं भवति ।

एवं पिण्डब्रह्माण्डयोरैक्यं सम्भूतम् ।

## ८ ISHVARA AND THE ADHISHTHANA DEVATAS

### ९ JIVA AND ISHVARA

स्थूलशरीराभिमानि जीवनामकं ब्रह्मप्रतिबिम्बं भवति ।
स एव जीवः प्रकृत्या स्वस्मात् ईश्वरं भिन्नत्वेन जानाति ।
अविद्योपाधिः सन् आत्मा जीव इत्युच्यते ।
मायोपाधिः सन् ईश्वर इत्युच्यते ।
एवं उपाधिभेदात् जीवेश्वरभेददृष्टिः यावत्पर्यन्तं तिष्ठति
तावत्पर्यन्तं जन्ममरणादिरूपसंसारो न निवर्तते ।
तस्मात्कारणान्न जीवेश्वरयोर्भेदबुद्धिः स्वीकार्या ।

### १० TAT TVAMASI (That Thou Art)

ननु साहंकारस्य किंचिज्ज्ञस्य जीवस्य निरहंकारस्य सर्वज्ञस्य
ईश्वरस्य तत्त्वमसीति महावाक्यात् कथमभेदबुद्धिः स्यादुभयोः
विरुद्धधर्माक्रान्तत्वात् ।
इति चेन्न । स्थूलसूक्ष्मशरीराभिमानी त्वंपदवाच्यार्थः ।
उपाधिविनिर्मुक्तं समाधिदशासम्पन्नं शुद्धं चैतन्यं
त्वंपदलक्ष्यार्थः ।
एवं सर्वज्ञत्वादिविशिष्ट ईश्वरः तत्पदवाच्यार्थः ।
उपाधिशून्यं शुद्धचैतन्यं तत्पदलक्ष्यार्थः ।
एवं च जीवेश्वरयो चैतन्यरूपेणाऽभेदे बाधकाभावः ।

### ११ JIVANMUKTA

एवं च वेदान्तवाक्यैः सद्गुरूपदेशेन च सर्वेष्वपि भूतेषु येषां ब्रह्मबुद्धिरुत्पन्ना ते जीवन्मुक्ताः इत्यर्थः ।

ननु जीवन्मुक्तः कः ?

यथा देहोऽहं पुरुषोऽहं ब्राह्मणोऽहं शूद्रोऽहमस्मीति

दृढनिश्चयस्तथा नाहं ब्राह्मणः न शूद्रः न पुरुषः

किन्तु असंगः सच्चिदानन्द स्वरूपः प्रकाशरूपः सर्वान्तर्यामी

चिदाकाशरूपोऽस्मीति दृढनिश्चय

रूपोऽपरोक्षज्ञानवान् जीवन्मुक्तः ॥

११.१ ASANGA (Unattached)

११.२ SATCHIDANANDA (Existence-Knowledge-Bliss)

११.३ SARVANTARYAMI (The Indweller of All)

११.४ CHIDAKASARUPA (Formless Consciousness)

११.५ APAROKSHA ~nANA

११.६ FREEDOM FROM BONDAGE

ब्रह्मैवाहमस्मीत्यपरोक्षज्ञानेन निखिलकर्मबन्धविनिर्मुक्तः स्यात् ।

## १२ KARMA

कर्माणि कतिविधानि सन्तीति चेत्

आगामिसञ्चितप्रारब्धभेदेन त्रिविधानि सन्ति ।

आगामि कर्म किम् ?

ज्ञानोत्पत्त्यनन्तरं ज्ञानिदेहकृतं पुण्यपापरूपं कर्म

यदस्ति तदागामीत्यभिधीयते ।

सञ्चितं कर्म किम् ?

अनन्तकोटिजन्मनां बीजभूतं सत् यत्कर्मजातं पूर्वार्जितं तिष्ठति

तत् सञ्चितं ज्ञेयम् ।

प्रारब्धं कर्म किमिति चेत् ।

इदं शरीरमुत्पाद्य इह लोके एवं सुखदुःखादिप्रदं यत्कर्म तत्प्रारब्धं भोगेन नष्टं भवति प्रारब्धकर्मणां भोगादेव क्षय इति ।

## १३ FREEDOM FROM BONDAGE

सञ्चितं कर्म ब्रह्मैवाहमिति निश्चयात्मकज्ञानेन नश्यति ।

आगामि कर्म अपि ज्ञानेन नश्यति

किंच आगामि कर्मणां नलिनीदलगतजलवत् ज्ञानिनां सम्बन्धो नास्ति ।

किंच ये ज्ञानिनं स्तुवन्ति भजन्ति अर्चयन्ति

तान्प्रति ज्ञानिकृतं आगामि पुण्यं गच्छति ।

ये ज्ञानिनं निन्दन्ति द्विषन्ति दुःखप्रदानं कुर्वन्ति

तान्प्रति ज्ञानिकृतं सर्वमागामि क्रियमाणं

यदवाच्यं कर्म पापात्मकं तद्गच्छति ।

सुहृदः पुण्यकृतं दुर्हृदः पापकृत्यं गृह्णन्ति ।

तथा चात्मवित्संसारं तीर्त्वा ब्रह्मानन्दमिहैव प्राप्नोति ।

तरति शोकमात्मवित् इति श्रुतेः ।

तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथ वा ।

ज्ञानसम्प्राप्तिसमये मुक्ताऽसौ विगताशयः ।

इति स्मृतेश्च ।

इति श्रीशङ्करभगवत्पादाचार्यप्रणीतः तत्त्वबोधप्रकरणं समाप्तम् ।